शुष्कमूलकतैलम्। इति शोथाधिकारः। इति भावप्रकाशः॥

शोथकः, पुं, (शोथ एव। स्वार्थे कन्।) शोथः। इति शब्दरत्नावली॥

शोथघ्नी, स्त्री,(शोथं हन्तीति। हन्+"अमनुष्यकर्त्तृके च।"३।२।५३। इति टक्।) पुनर्नवा। इत्यमरः। शालपर्णी। इति राजनिर्घण्टः॥ शोथनाशके, त्रि॥

शोथजित्, पुं,(शोथं जयतीति। जि+क्विप्।) भल्लातकः। इति त्रिकाण्डशेषः॥

शोथजिह्वः, पुं, (शोथे जिह्वः कुटिल इव। तन्नाशकत्वात्।) पुनर्नवा। इति त्रिकाण्डशेषः॥

शोथहृत्, पुं, (शोथं हरति नाशयतीति। हृ+क्विप्।) भल्लातकः। इति रत्नमाला॥ शोफहारके, त्रि॥

शोधनं, क्ली,(शोधयतीति। शुध+णिच्+ल्युः) कङ्कुष्ठम्। इति राजनिर्घण्टः॥ (शुध+भावे ल्युट्।) शौचम्। इति शुधधात्वर्थदर्शनात्॥ (प्रायश्चित्तम्। यथा, मनुः। ११। १६१।
"अभोज्यमन्नं नात्तव्यमात्मनः शुद्धिमिच्छता।
अज्ञानभुक्तन्तूत्तार्य्यं शोध्यं वाप्याशु शोधनैः॥")
विष्ठा। इति शब्दचन्द्रिका॥ कासीसम्। इति राजनिर्घण्टः॥ विहिताविहितमासादिविचारणम्। यथा,—
"सूर्य्यग्रहणकालेन समानो नास्ति कश्चन।
तत्र यद्यत् कृतं सर्व्वमनन्तफलदं भवेत्।
न मासतिथिवारादिशोधनं सूर्य्यपर्व्वणि॥"
इति मलमासतत्त्वम्॥ *॥
धातुनिर्दोषीकरणम्। यथा,—
"पत्तलीकृतपत्राणि हेम्नो वह्नौ प्रतापयेत्।
निषिञ्चेत्तप्ततप्तानि तैलतक्रे च काञ्जिके॥
गोमूत्रे च कुलत्थानां कषाये तु त्रिधा त्रिधा।
एवं हेम्नः परेषाञ्च धातूनां शोधनं भवेत्॥"*॥
व्रणादिपरिष्करणम्। यथा,—
"व्रणस्य त्वविशुद्धस्य क्वाथः शुद्धिकरः परः।
पटोलनिम्बपत्रस्य सर्व्वत्रैव प्रयुज्यते॥
वातिके दशमूलानां क्षीरिणां पैत्तिके व्रणे।
आरग्वधादेः कफजे कषायः शोधनं हितम्॥"
अपि च।
"अष्टमेनांशशेषेण चतुर्थेनार्द्धकेन वा।
अथवा क्वाथनेनैव सिद्धमुष्णोदकं वदेत्।
श्लेष्मामवातमेदोघ्नं वस्तिशोधनदीपनम्॥"
इति च भावप्रकाशः॥ *॥
लिखितपत्रादेः प्रमाणीकरणम्। यथा। लेख्यशोधनमाह कात्यायनः।
"स्वहस्तलेख्यसन्देहे जीवतो वा मृतस्य च।
तत् स्वहस्तकृतैरन्यैः पत्रैस्तल्लेख्यनिर्णयः॥"*
विरुद्धलिखितस्य शुद्धीकरणम्। यथा। तच्छोधनमाह बृहस्पतिः।
"न्यूनाधिकं पूर्व्वपक्षं तावद्वादी विशोधयेत्।
न दद्यादुत्तरं यावत् प्रत्यर्थी सभ्यसन्निधौ॥"
कात्यायनः।
"शोधयेत् पूर्व्वपक्षन्तु यावन्नोत्तरदर्शनम्।
उत्तरेणावरुद्धस्य निवृत्तं शोधनं भवेत्॥"
इति व्यवहारतत्त्वम्॥*॥
अङ्कस्य हरणम्। यथा,—
"भाज्याद्धरः शुध्यति यद्गुणः स्या-
दन्त्यात् फलं तत् खलु भागहारे।
समेन केनाप्यपवर्त्त्य हार-
भाज्यौ भजेद्वा सति सम्भवे तु॥"
इति लीलावती॥
अन्यत् शुद्धिशब्दे द्रष्टव्यम्॥

शोधनः, पुं, (शोधयतीति। शुध+णिच्+ल्युः।) निम्बूकः। इति राजनिर्घण्टः॥

शोधनः, त्रि, (शोधयतीति। शुध+णिच्+ल्युः।) शुद्धिकारकः। यथा,—
"महासान्तपनः शूद्रे तप्तकृच्छ्रस्तु पावनः।
जलोपवासकृच्छ्रस्तु ब्रह्मकूर्चस्तु शोधनः॥"
इति प्रायश्चित्ततत्त्वधृतविश्वामित्रवचनम्॥
यथा च।
"तैलसैन्धवयष्ट्याह्वनिम्बपत्रनिशायुगैः।
त्रिवृद्दन्तियुतैः पिष्टैः प्रलेपो व्रणशोधनः॥"
इति भावप्रकाशः॥

शोधनी, स्त्री, (शोध्यतेऽनयेति। शुध शौचे+णिच्+करणे ल्युट्। ङीप्।) संमार्ज्जनी। इत्यमरः॥ ताम्रवल्ली। नीली। इति राजनिर्घण्टः॥

शोधनीबीजं, क्ली,(शोधन्या बीजमिव बीजं यस्य।) जयपालः। इति राजनिर्घण्टः॥

शोधनीयः, त्रि, शोधितव्यः। शोध्यः। शुधधातोरनीयप्रत्ययेन निष्पन्नः॥ (यथा, कथासरित्सागरे। ५३। १४१।
"भुक्तं मया तदन्नं यत्शोधनीयं मयापि तत्॥")

शोधितं, त्रि,(शोध्यते स्मेति। शुध+णिच्+क्तः।) मक्षिकाद्यपनयनेन कृतशोधनव्यञ्जनादि। तत्पर्य्यायः। संमृष्टम् २। इत्यमरभरतौ॥ अपि च।
"व्यञ्जने केशकीटादिशुद्धे संमृष्टशोधिते॥"
इति शब्दरत्नावली॥
अपनीतमलम्। तत्पर्य्यायः। निर्णिक्तम् २ मृष्टम् ३ निःशोध्यम् ४ अनवस्करम् ५। इत्यमरभरतौ॥

शोफः, पुं,(शु गतौ। बाहुलकात् फः।) शोथः। इत्यमरः॥ (यथा, सुश्रुते। १। १४।
"तद्दुष्टं शोणितमनिर्ह्रियमाणं कण्डूशोफरागदाहपाकवेदना जनयेत्॥")

शोफघ्नी, स्त्री, (शोफं हन्तीति। हन+टक्। ङीप्।) शालपर्णी। रक्तपुनर्नवा। इति राजनिर्घण्टः॥

शोफनाशनः, पुं, (शोफं नाशयतीति। नश+णिच्+ल्युः।) नीलवृक्षः। इति राजनिर्घण्टः॥ शोथनाशके, त्रि॥

शोफहृत्, पुं,(शोफं हरतीति। हृ+क्विप्।) भल्लातकः। इति भावप्रकाशः॥ शोथहारके, त्रि॥

शोभनं, क्ली, (शोभते इति। शुभ+ल्युः।) पद्मम्। इति शब्दचन्द्रिका॥ (शुभ+भावे ल्युट्। शुभम्। यथा, भागवते। ५। १९। २१।
"अहो वतैषां किमकारि शोभनं
प्रसन्न एषां स्विदुत स्वयं हरिः॥")

शोभनः, पुं, (शुभ+ल्युः।) ग्रहः। इति धरणिः॥ विष्कम्भादिसप्तविंशतियोगान्तर्गतपञ्चमयोगः। इति मेदिनी॥ तत्र जातफलम्।
"स्याच्छोभनः शोभनयोगजन्मा
दक्षो विपक्षप्रतिलब्धवित्तः।
सदुत्तरत्नारुवपुः सुधीरः
संमानयुक्तो मनुजः प्रवीणः॥"
इति कोष्ठीप्रदीपः॥

शोभनः, त्रि, (शोभते इति। शुभ+ल्युः।) सुन्दरः। इति मेदिनी॥ अस्य पर्य्यायो मनोज्ञशब्दे द्रष्टव्यः॥

शोभनकः, पुं, (शोभते इति। शुभ+ल्युः। ततः कन्।) शोभाञ्जनवृक्षः। इति शब्दचन्द्रिका॥ शोभनशब्दकारके, त्रि॥

शोभना, स्त्री, (शोभन+टाप्।) हरिद्रा। गोरोचना। इति राजनिर्घण्टः॥

शोभा, स्त्री, शोभन्तेऽनया। (शुभ+करणे घञ्। टाप्।) दीप्तिः। तत्पर्य्यायः। कान्तिः२ द्युतिः३ छविः४। इत्यमरः॥ द्युती ५ छवी ६ इति तट्टीका॥ अभिख्या ७। इति जटाधरः॥ शुभा ८ भाः ९ श्रीः १० भासा ११ भा, १२ इति शब्दरत्नावली॥ सुषमा १३ छाया १४ विभा १५ रुक्प्रिया १६ भानम् १७ भातिः १८ कमा १९ रमा २०। इति राजनिर्घण्टः॥ तस्या लक्षणम्।
"सा शोभा रूपभोगाद्यैर्यत् स्यादङ्गविभूषणम्।
शोभैव कान्तिराख्याता मन्मथाप्यायनोज्ज्वला॥"
इत्युज्ज्वलनीलमणिः॥ *॥
गोपीविशेषः। यथा,—
"दृष्टस्त्वं शोभया गोप्या युक्तश्चन्दनकानने।
सद्यो मच्छब्दमात्रेण तिरोधानं कृतं त्वया॥
शोभा देहं परित्यज्य जगाम चन्द्रमण्डलम्।
ततस्तस्याः शरीरञ्च स्निग्धं तेजो बभूव ह॥
संविभज्य त्वया दत्तं हृदयेन विदूयता।
रत्नाय किञ्चित् स्वर्णाय किञ्चिन्मणिवराय च॥
किञ्चित् स्त्रीणां मुखाब्जेभ्यः किञ्चिद्राजाय किञ्चन।
किञ्चित् किशलयेभ्यश्च पुष्पेभ्यश्चापि किञ्चन॥
किञ्चिच्चन्दनपङ्केभ्यस्तोयेभ्यश्चापि किञ्चन।
किञ्चित् फलेभ्यः शस्येभ्यः सुपक्वेभ्यश्च किञ्चन।
किञ्चिन्नूतनवस्त्रेभ्यो दुग्धेभ्यश्चापि किञ्चन॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ८ अध्यायः॥*॥
हरिद्रा। गोरोचना। इति राजनिर्घण्टः॥

शोभाञ्जनः, पुं, (शोभं रुचिरं अञ्जनं यस्मात्।) वृक्षविशेषः। सजिना इति भाषा। तत्पर्य्यायः। शिग्रुः २ तीक्ष्णगन्धकः ३ अक्षीवः ४ मोचकः ५। इत्यमरः॥ तीक्ष्णगन्धः ६ सुतीक्ष्णः ७ बहु-